National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 59-61
© 2026 NJHSR
www.sanskritarticle.com

**चन्द्रप्रकाशपाण्डेयः**
शोधच्छात्रः, साहित्यम् विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**चन्द्रप्रकाशपाण्डेयः**
शोधच्छात्रः, साहित्यम् विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# श्रीमद्रामायणानुसारेण भारतीयज्ञानपरम्परायाम् अयोध्यायाः संस्कृतिः

**चन्द्रप्रकाशपाण्डेयः**

सम्- कृ -क्तिन् -संस्कृतिः शब्दोऽयं निष्पद्यते संस्कृतिः कस्यापि जातेः राष्ट्रस्य वा मनः, रुचिः, चरित्रं, विचारः, कला, कौशलं, सभ्यता च इति क्षेत्रे आध्यात्मिकविकासस्य नाम इति व्यपदेशः। मनुष्याणां वाह्यविकाशः सभ्यता तथा आन्तरिकविकाशः संस्कृतिः इति कथ्यते भारतीयज्ञानपरम्परायामयोध्यायाः योगदानं नितरामविस्मरणीयं वयं मन्यामहे अयोध्या इति पदस्य व्युत्पत्तिलभ्योऽर्थः योद्धुम् अशक्या इति अर्थात् युद्धद्वारा यस्या उपरि विजयप्राप्तिः नितरां न भवितुमर्हति सा भवति अस्माकीना अयोध्या,

**सर्वोपपातकैर्युक्तैर्ब्रह्महत्यादिपातकैः।**
**नायोध्या शक्यते यस्मात् तामयोध्यां ततो विदुः।।**[1]

पुराणधर्मशास्त्रादिशास्त्रेषु येषांमुपपातकानां ब्रह्महत्यादि महापातकानां कृतमस्ति वर्णनं तानि सर्वाणि उपपातकानि तथा ब्रह्महत्यादिमहापातकानि तासां दिव्यायोध्या पुरीणां समक्षम् एतानि महापातकोपपातकानि योद्धुं न प्रभवन्ति इति आशयः आचारविचारव्यवहारसदाचारविषये नितरामयोध्या भारतीयज्ञापरम्परायाः औन्नत्यं करोति अयोध्या तु एकं तीर्थस्थामेव नास्ति अपितु भारतीयज्ञानपरम्परायां तस्याः योगदानमद्वितीयं वर्तते यथा- तत्रस्था वास्तुकलाशैली संस्कृतिः परम्परा सभ्यता मानवीयता, राजनैतिक-आर्थिक-सामाजिकस्थितिः,इत्यादयः विषयाः तत्रान्तर्निहिताः भवन्ति बह्वीनां संस्कृतीनामाधारभूतग्रन्थमिदं रामायणम्, रामायणग्रन्थोऽय निरन्तरं भारतीयज्ञानपरम्परायाः निर्वाहको भवति सम्पूर्णे रामायणे अयोध्याया अयोध्यात्वं नितरां परिपोष्यति।

**अष्टचक्रा नवद्वारा देवानां पूरयोध्या।**
**तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः।।**[2]
**अयोध्या मथुरा माया काशी कांची अवंतिका।**
**पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः॥**[3]

सर्वप्रथमम् अथर्ववेदः अयोध्यायाः वर्णनं करोति अर्थात् वैदिककालादेव अयोध्या भारतीय-ज्ञानपरम्परायाः परिरक्षणं परिपोषणं च करोति ।

सुभगसलिलायाः सरयूनद्यास्तीरे सुशोभमाना वन्द्यमाना अयोध्या विराजते शैतत्वपावन्त्वादि-धर्मयुक्तायां धर्मनगरी अयोध्यायां गमनमात्रेण आध्यात्मिकमार्गं प्रति सर्वे आकृष्यमाणाः भवन्ति अत्र नास्ति संशयावकाशः ।

**कोशलो नाम विदितः स्फीतो जनपदो महान्।**
**निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ।।**[4]
**अयोध्याया नाम नगरी तत्रासील्लोकविश्रुता।**
**मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम्।।**[5]

कोशलनाम्ना एकः महान् जनपदो वर्तते यः सरयूनद्याः तीरे विराजते धनधान्येन सुसम्पन्नः सुखसमृद्धिशाली जनपदोऽयं वर्तते तस्मिन्नेव अयोध्या नाम्नी एका लोकविश्रुता समस्तलोके सुविख्याता सुगुणसम्पन्ना नगरी नितरां विलसति स्वयं मनुः तां पुरीं निर्मितवान् तस्याः महापुर्याः लम्बमानं द्वादश योजनं यावत् वर्तते तथा च योजनत्रयं विस्तीर्णा वर्तते सा सर्वोत्तमा नगरी, दुन्दुभीमृदङ्गवीणा-दिवाद्यन्त्राणां सप्तस्वरेण गुञ्जगुञ्जयमाना आसीत्।

**कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् ।**

**द्रष्टुं शक्यमयोध्यायां नाविद्वान् न च नास्तिकः ।।**[6]

एतादृशी परिपुष्टा समृद्धा अस्माकीना भारतीयज्ञापरम्परा आसीत् तस्यां पुर्यां कृपणः क्रूरः कामी नास्तिकः न प्राप्यते स्म सर्वे धर्मशीलाः संयमिनः मुदिताननाः महर्षयः वत् अमला आसन् ।

**नामृष्टभोजी नादाता नाप्यनंगदनिष्कधृक् ।**[7]

तत्र न अमृष्टभोजी आसीत् तत्र न अदाता न अनङ्गनिष्कधिक् आसीत् यथा वेदे – **आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः ।**[8]

अस्माकं भारतीयज्ञानपरम्परायां निखिलमपि ज्ञानं पिनद्धं वर्तते तस्यामयोध्यायाममृष्टभोजी न आसीत् अस्मात् किं ज्ञायते तत्र कारणीभूता तत्रस्था विशिष्टा भारतीयज्ञानपरम्परा ।

**ऊनशोडशवर्षो मे रामो राजीवलोचनः।**

**न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः।।**[9]

विश्वामित्रऋषिः दशरथं प्रत्युवाच स्वपुत्रान् माम् ददातु अनन्तरं दशरथेन प्रतिपादितं राजीवलोचनाभिरामः मम रामस्य आयु उन्षोडशवर्षो वर्तते राक्षसैस्ह तेषां युद्धयोग्यता मया न दृष्यते अहं सर्वं दास्यामि परञ्च स्वपुत्रान् विहाय अत्र पितुः स्वपुत्रान् प्रति सर्वोत्कृष्टस्नेहभावः दरीदृष्यते एतादृशः निर्मलस्वचछप्रेमभावः अस्माकं भारतीयपरम्परायामेव दृष्यते ।वनवासस्य विषयं श्रुत्वा रामस्यानुवचनमिदम् ।

**तदप्रियममित्रघ्नो वचनं मरणोपमम्।**

**श्रुत्वा तु विव्यथे रामः कैकेयीं केदमब्रवीत् ।।**[10]

अप्रियकष्टदायकं वनगमनस्य वचनं निशम्य सकलनयनाभि-राम-श्रीरामः किञ्चिदपि दुखं नानुभूतवान् अतः अद्यतनीये समाजे यदि वयं पश्यामः चेत् कैः धनं न वाञ्छ्यते वृहत्तरं राज्यं के नेच्छन्ति धनं केषां शत्रुः, अद्यतनीयाः मानवाः धनार्जनार्थमनैतिककार्यं कुर्वन्तः मानवी-यतां घ्नन्ति परञ्च सम्पूर्णभुवनस्य राज्यपदस्याधिकारी वनप्रवासस्य वार्तां श्रुत्वा कष्टं नानुभूतवान् कुत्र राज्याभिषेकः तथा कुत्र वनप्रवासःअतः धीरपुरुषाः सर्वदा तटस्थाः भवन्ति,

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**[11]

**नहि रामात् प्रियतमो ममास्ते भुवि कश्चन।**

निषादराजस्य वचनमिदं यत् रामात् प्रियतरः मत्कृते इह भुवि नास्ति कश्चन श्रीरामं प्रति प्रीतिभावः रमणीयतरो वर्तते ।

**न च सीता त्वया हीना न चाहमपि राघव ।**

**मुहुर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ ।।**[12]

यदा रामेण प्रतिपादितं लक्ष्मण अयोध्यां प्रति गच्छेत तदा लक्ष्मणस्य इयमुक्ति हे रघुनन्दन त्वया हीना भगवती सीता तथैव त्वया हीनोऽहं कदापि न जीवावः यथा जलं बिना मत्स्यस्य जीवनं नैव सम्भवति अत्र विशेषरूपेण भातृभावः दृष्यते भ्रातुः भ्रातरं प्रति स्नेहभावः दृढतरो वर्तते तथैव मातासीतायाः पतिव्रतधर्मोऽपि अत्र परिलक्ष्यते एतादृशोत्कृष्टभावेन सुसम्पन्ना परिपूर्णा वर्तते अस्माक-मयोध्याया-संस्कृतिः।

**यदा भरतः राममानयनार्थं जगाम तदा न रामः आजगाम तदा भरतस्य इयमुक्तिः**

**छत्रं धारयत क्षिप्रमार्ययादाविमौ मतौ ।**

**आभ्यां राज्ये स्थितो धर्मः पादुकाभ्यां गुरोर्मम् ।।**[13]

भवन्तः सर्वे चरणपादुकयोः उपरि छत्रं धारयन्तु श्रीरामचन्द्रस्य साक्षात् स्वरूपा इयं चरणपादुका इति कृत्वा मम गुरूणां चरणपादुकया अस्मिन राज्ये धर्मस्य स्थापना भविष्यति अत्र नितान्तरूपेण लोभस्याभावो वर्तते । शास्त्रे निगदितं वर्तते लोभः सर्वविधपापस्यकारणं भवति ।

**लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते ।**

**लोभात् मोहश्च नाशश्च लोभः पापस्य कारणम् ।।**[14]

लङ्कायां सीतामातुः पार्श्वे गत्वा रावणः प्रलोभनपूर्णं वचनम् उवाच तथाऽपि मातरि सीतायां विकारोत्पत्ति न संजाता कथं तत्रापि अयोध्यायाः संस्कृतिः कारणीभूता इति कथितुं शक्यते ।

**क्रीडन्ती राजहंसेन पद्मषण्डेषु नित्यशः ।**

**हंसी सा तृणमध्यस्थं कथं द्रक्ष्येत मद्गुकम् ।।**[15]

या हंसी पद्मषण्डेषु नित्यशः स्व राजहंसेन सह क्रीडां करोति सा हंसी कथं तृणेषु मध्स्थं जलकाकं पश्यति अत्र काक्वा ध्वन्यते अर्थात् कथमपि न पश्यति।

**उपसंहारः –**

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।**

**करोति प्रीतिं कीर्तिं च साधुकाव्यनिबन्धनम् ।। १.२ ।।**

**चतुर्वर्गफलप्रीप्ति सुखादल्पधियामपि। विश्वनाथः कथयति।**

सप्तपुरीषु आदिमा पुरी भवति अस्माकीना अयोध्या पुरी सर्वेषु तीर्थस्थलेषु तत्रस्था काचन विशिष्टा परम्परा विशिष्टा संस्कृतिः भवत्येव तथैव अयोध्यायाः संस्कृतिः सम्पूर्णे मानवीयजीवने व्यवहारे आचारे दृश्यते यथा तत्र स्थितस्य समाजस्य पाण्डित्यमपि तया संस्कृत्या एव ज्ञायते श्रीमद्रामायणेषु अयोध्याया विशिष्टं स्थानम् आवहति यत्र यत्र रामत्वं तत्र तत्र अयोध्यात्वं तर्हि यत्र यत्र रामत्वदर्शनं तत्र अयोध्यायाः संस्कृतेः दर्शनं भवत्यव यथा रामादिवत् वर्तितव्यं न रावणादिवत् इत्योक्तदिशा अयोध्यायाः संस्कृते अनुशरणं कुर्वन्ति ते सर्वे अवश्यमेव रामत्वं प्राप्स्यन्ति रामायणे भ्रातृस्नेहः मातुः पितुः सेवा प्रजाजनस्य सेवा प्रशासनस्य वैशिष्ट्यं सर्वेषां वर्गाणां जनानां सन्माननम् इतोऽपि तिर्यग्योनिचराणां जीवानां कृते

स्नेहप्रेमभावना यत्र दृष्यते तत्र अयोध्यायाः संस्कृते साक्षातकारः अस्माभिः क्रियते अतः रामस्य अयोध्यातः निर्गमनमपि सुखकरं तथैव आगमनमपि आनन्ददायकं नितरां भवति ।

**सन्दर्भग्रन्थसूची –**


1. अथर्ववेदः – पण्डितश्रीरामशर्मा । हरिद्वार ब्रह्मवर्चस् 2002 ।
2. श्रीमद्वाल्मीकीयरामायण – गीताप्रेस गोरखपुर सं – 2069 ष
3. हितोपदेशः -निर्णयसागरमुद्रणम् मुम्बई 2000
4. निर्णयसागरमुद्रणम् मुम्बई 1978


**पाद टिप्पणी**

[1]स्क.पु. वै.ख.अ.वि,1.61

[2]अथर्ववेदः 10.2.31

[3]गरुडपुराणे सारोद्धारे भगवद्गरुणसंवादः 16.113

[4]बाल्यकाण्डे 5.5

[5]तत्रैव 5.6

[6]तत्रैव 6.8

[7]बाल्यकाण्डे 6.11

[8]छान्दोग्योपनिषदि 7.26.2

[9]बाल्यकाण्डे 20.2

[10]अयोध्याकाण्ड 19.1

[11]मनुस्मृति 6.92

[12]अयोध्याकाण्ड 53 31

[13]अयोध्याकाण्ड 115.16

[14]हितोपदेशः

[15]अरण्यकाण्ड 56.20